# शास्त्रिद्वितीयवर्षम्
# षष्ठपत्रम्, विषयः – नव्यन्यायः
# शैक्षिकनिष्पत्तिः
### ग्रन्थः – सिध्दान्तलक्षणम्

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖ मणिकारोक्तं व्यापकसामानाधिकरण्यरूपं व्याप्तिलक्षणं , तत्र चालनीन्यायेन अव्याप्तिप्रसङ्गं, दीधितिकारीयपरिष्कारं, शङ्कासमाधाने, दण्ड्यादिसाध्यकस्थले परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वस्वीकारं चावगन्तुं शक्नुवन्ति।
- ❖ लक्षणे यद्रूपविशिष्टेत्यस्य द्विधा सार्थक्यं, मतभेदेन असमानाधिकरणान्तदलसार्थक्यं, द्रव्ये संयोगसामान्याभाव स्वीकर्तृमतनिराकरणं , नव्यमतानुसारेण तद्दलसार्थक्यं च विज्ञातुं शक्नुवन्ति।
- ❖ व्याप्यवृत्तिसाध्यकस्थले लक्षणे असमानाधिकरणान्तदलस्य अनावश्यकताम्, अव्याप्यवृत्तिसाध्यकत्वपरिष्कारम् , असामानाधिकरण्यकुक्षौ प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वस्य प्रयोजनं , लक्षणे अत्यन्तपदसार्थक्यं च विजानीयुः।
- ❖ कालिकेन गवादिसाध्यकस्थले अव्याप्तिशङ्कापरिहारौ , संसर्गाभावस्वरूपं , असामानाधिकरण्यशरीरे प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वस्य सार्थक्यं, प्रतियोग्यसमानाधिकरणत्वदलस्य परिष्कारं , लक्षणे तन्निवेशक्रमं च जानीयुः।
- ❖ हेतुसामानाधिकरण्यशरीरे हेतोः सम्बन्धविशेषनिवेशप्रयोजनं, प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वसार्थक्यं , सामानाधिकरण्यादौ अधिकरणत्वस्थाने सम्बन्धित्वस्यावश्यकतां , गगनादेः द्रव्यत्वव्याप्यत्वं, पृथिवीत्वादिव्यापकत्वं चाधिगच्छेयुः।
- ❖ सम्बन्धविशेषेण व्याप्यज्ञानेन सम्बन्धविशेषेण व्यापकज्ञानं, व्यापकाभावज्ञानेन व्याप्याभावज्ञानं , धर्मिणो धर्मव्याप्यत्वव्यापकत्वज्ञानं च प्राप्नुयुः ।
- ❖ मूलोक्तस्य यथाश्रुतलक्षणस्य कालमात्रवृत्तिहेतुकस्थलादिषु दोषं, तद्वारणाय लक्षणस्य प्रकारान्तरेण परिष्करणं , साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावनिवेशकल्पं, तत्र दलसार्थक्यं , तादृशाभावप्रतियोगितासामान्ये उभयाभावनिवेशकल्पं , तत्र दलसार्थक्यं , विषयत्वप्रतियोगित्वाधिकरणत्वादीनां क्लृप्तपदार्थातिरिक्तत्वं च विजानीयुः ।

**********